संस्कृत

पु.गं. ६८

कवच

शरीव कवच

६९८ / श्लो. ४६०

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशायनमः॥श्रीरामायनमः॥अथशिवकवचविधिर्लिख्यते
तत्र कालः॥कार्तिकेमार्गशीर्षेवामाघेवैशाखसंज्ञिके॥श्रावणेबहु
लेपक्षेजपस्यारंभणंकुरु॥ एकादशशतंकुर्यादेकादशसहस्रतः॥
एकादशंतुलक्षंवाजपंकुर्याद्ध्यानतत्परः॥उत्तमंमध्यमंप्रोक्तंकेनिष्ठं
चस्वशक्तितः॥ शिवस्यकवचंजप्त्वाविभूतिंधारयेत्ततः॥ग्रहभूतपि
शाचाश्चयक्षगंधर्वराक्षस्स जपेद्यत्तस्यनश्यंतियःकुर्याच्छिव
संनिधौ॥शुचौदेशेसमासीनोयथावत्कल्पितासनः॥ जितेंद्रियो
जितःप्राणश्चिंतयेच्छिवमव्ययं॥अथप्रयोगः॥देशकालौसंकीर्त्य॥
ममइहजन्मनिजन्मजन्मांतरेचनिखिलदुरितदौर्भाग्यदुःस्वप्नदुर्निमि ॥राम॥
त्तग्रहभूतप्रेतपिशाचब्रह्मराक्षसादिबाधाशांत्यर्थंपुत्रपौत्राद्यवि ॥१॥
छिन्नसंततिस्थिरलक्ष्मीशत्रुपराजयसदाशीघ्रत्वसंसिध्यर्थंअ

1A

मुकसंख्यया शिवकवचसहस्राक्षरोक्तमंत्रजपं शिवपंचाक्षरेण
संपुटितं अमुककामनास्वयं ब्राह्मणद्वारा वा शिवकवचोक्तमंत्रजपं
करिष्ये इति संकल्प्य ॥ आदौ निर्विघ्नतासिध्यर्थं गणपतिपूजनं पुण्या
हवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यादिवरणं करिष्ये ॥ उक्तरीत्या कु
र्यात् ॥ आचार्यादीन् वृत्वा प्रार्थयेत् ॥ ततः आचार्ये यजमानेन सह जपस्थाने
शिवालये वा गत्वा ॥ आचम्य प्राणानायम्य दर्भान् धारयमाणो देशकालौ सं
कीर्त्य पूर्वसंकल्पितजपसंख्यापरिपूर्त्यर्थं प्रतिदिनमष्टोत्तरशतावृत्ति सं
ख्यया शिवकवचमंत्रजपं करिष्ये ॥ श्रीगणपतिं नत्वा ॥ आगमोक्तप्रकारेणा
सनविधिं भूतशुध्यादि पवनपावनांतमात्मशुद्धिं विधाय ॥ यदत्रेति भूता
न्युत्सार्य ॥ शुचीवो हव्येति पंचगव्येन ॥ आपोहिष्ठेति शुद्धोदकेन भूमिं प्रो
क्ष्य ॥ स्वस्त्ययनं तार्क्ष्यमिति मंत्रद्वयं पठेत् ॥ तत्कल्पोक्तेन न्यासं कुर्यात् ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

2

शिवक॰ ॥२॥

न्यासमाचरेत् ॥ अस्य श्रीशिवकवचमंत्रस्य ॥ शंभूऋषिः ॥ श्रीसांबसदा
शिवोदेवता ॥ अनुष्टुप्छंदः ॥ महेशायेतिबीजं ॥ गौरीतिशक्तिः ॥ शर्वायेतिकी
लकं ॥ श्रीसांबसदाशिवप्रीत्यर्थन्यासेविनियोगः ॥ ॐशंभवेऋषयेनमः
शिरसि ॥ ॐअनुष्टुप्छंदसेनमः मुखे ॥ ॐश्रीसांबसदाशिवोदेवताय
नमः हृदये ॥ ॐमहेशायेतिबीजायनमः गुह्ये ॥ ॐगौरीशक्तयेनमः पाद
योः ॥ ॐशर्वायेतिकीलकायनमः सर्वांगे ॥ सदात्मनेनमः अंगुष्ठाभ्यांन
मः ॥ गुरवेतर्जनीभ्यांनमः ॥ अघोरायनमः मध्यमाभ्यांनमः ॥ अमृतेश्वरा
यनमः अनामिकाभ्यांनमः ॥ ईश्वरायनमः कनिष्ठिकाभ्यांनमः ॥ स्थिरधन्वि
नेनमः करतलकरपृष्ठाभ्यांनमः ॥ एवंहृदयादिषडंगं ॥ प्रणवेनदिग्बंधनकृ ॥राम॥
त्वा ॥ अग्नयेनमः हृदयायनमः ॥ त्र्यंबकायनमः शिरसेस्वाहा ॥ त्रिनेत्रायन ॥२॥
मः शिखायैवषट् ॥ वसिष्ठायनमः कवचायहुं ॥ अनुष्टुप्छंदसेनमः नेत्रत्र

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

2A

पायवौषट् ॥ रुद्रोदेवतायैनमः अस्त्रायफट् ॥ अथदिग्न्यासः ॥ ॐ
दुर्गायैनमः प्राचींदिशंनिबध्नामि ॥ विंविनायकायनमः दक्षिणदिशंनि
बध्नामि ॥ नंनंदिकेश्वरायनमः प्रतीचींदिशंनिबध्नामि ॥ क्षंक्षेत्रपालायन
मः उदीचींदिशंनिबध्नामि ॥ धंधर्मराजायनमः सर्वादिशोनुनिबध्नामि ॥
अथमंत्रनेत्रग्रंथे ॥ अयंविशेषः ॥ ॐ ब्रह्मणेनमः पादयोः ॥ ॐ विष्णवेनमः
हृदये ॥ ॐ महेश्वरायनमः शिरसि ॥ ॐ सप्तऋषिभ्योनमः शिखायां ॥
ॐ अश्विभ्यांनमः श्रोत्रयोः ॥ ॐ शशिभास्कराभ्यांनमः चक्षुषि ॥ ॐ स
रस्वत्यैनमः जिह्वायां ॥ ॐ अग्नयेनमः वाचि ॥ ॐ मरुद्भ्योनमः दंतपंक्तौ ॥ ॐ
हव्यवाहनायनमः जठरे ॥ ॐ गंधर्वाप्सरोभ्यांनमः पादयोः ॥ ॐ महामेरु
रथेभ्योनमः हृत्पद्मकर्णिकाभ्यांनमः ॥ ॐ अष्टौवसुभ्योनमः वामह
स्ते ॥ ॐ एकादशरुद्रेभ्योनमः दक्षिणहस्ते ॥ ॐ द्वादशादित्येभ्योनमः नाभौ ॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

3

शिवक० ॐ अष्टभैरवेभ्योनमः सर्वांगे ॥ अथशिवपंचाक्षरन्यासः ॥ ॐ वामदेवा
॥२॥ यनमः शिरसि ॥ ॐ ऋषयेनमः मुखे ॥ ॐ पंक्तिछंदसेनमः हृदये ॥ ॐ श्री
सांबसदाशिवायनमः गुह्ये ॥ ॐ बीजायनमः पादयोः ॥ ॐ उमाशक्तयेन
मः सर्वांगे ॥ ॐ अंगुष्ठायनमः दक्षिणजानुनी ॥ ॐ शर्वायनमः वामजा
नुनी ॥ ॐ विरूपाक्षायनमः दक्षिणकटे ॥
ॐ त्र्यंबकायनमः दक्षिणहस्ते ॥ ॐ कपर्दिनेनमः वामहस्ते ॥ ॐ भैरवा
यनमः दक्षिणांसे ॥ ॐ शूलपाणयेनमः वामांसे ॥ ॐ ईशानायनमः
मूर्ध्नि ॥ ॐ महेशायनमः सर्वांगे ॥ ॐ पंचवक्त्रायनमः इतितर्जन्यंगु
ष्ठयोगेनदिग्बंधनंकुर्यात् ॥ अथध्यानं ॥ हस्ताभ्यांकलशद्वयामृतघटं ॥राम॥
कैलासकांतंशिवंस्वस्थांभोजगतंनवेंदुमुकुटंदेवंत्रिनेत्रंभजेत् ॥ ॥२॥
१ ॥ श्रीसांबंवृषारूढंहिरण्यबाहुंहिरण्यरूपंपशुपाशविमोचकंपुरु

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

3A

बंकृष्णपिंगलंऊर्ध्वरेतसंविरूपाक्षंविश्वयनः सहस्राक्षंसहस्रशीर्ष
सहस्रचरणंविश्वतोबाहुंविश्वात्मानमेकमद्वैतंनिष्कलंकंनिर्गुणंशांतं
शिवमक्षरंअव्ययंहरीहिरण्यगर्भादिस्तूयमानमप्रमेयमनाद्यंतंशिवं
मृगटंकाभयवंशुक्लव्याघ्राजिनांबरंचंद्रचूडंत्रिनेत्रंपंचवक्त्रंशिवंभ
जेत् ॥ इतिध्यात्वा ॥ अहंशिवःशिवःसोहमितिचेतसिचिंतयेत् ॥ इतिसर्व
भूतस्थंसच्चिदानंदस्वरूपमात्मानंध्यात्वात्मानसोपचारैःपूजयेत् ॥
लंपृथिव्यात्मकंगंधंक० ॥ हंआकाशात्मकंपुष्पंक० ॥ यंवाय्वात्मकंधूपं
क० ॥ रंअग्न्यात्मकंदीपंक० ॥ वंअमृतात्मकंनैवेद्यंक० ॥ लंहंयंरंवंसर्वतत्त्व
मात्मकंतांबूलंक० ॥ अहमस्मिशिवोहमस्मिब्रह्माहमस्मीतिभावयेत्
॥ अथजपः ॥ अस्यश्रीशिवकवचस्तोत्रमंत्रस्य ॥ ऋषभोयोगीश्वरऋ
षिः ॥ श्रीसांबसदाशिवरुद्रोदेवता ॥ ह्रांबीजं ॥ ह्रींशक्तिः ॥ क्रोंकीलकं ॥

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

4

शिवक० ॥४॥

श्रीसांबसदाशिवप्रीत्यर्थंशिवकवचस्तोत्रमंत्रजपेविनियोगः॥ अथ
न्यासः॥ ॐनमोभगवतेमहारुद्रायज्वलज्वालामालिनेॐह्रींश्रींक्लींॐ
अंगुष्ठाभ्यांनमः॥ ॐनमोभगवतेमहारुद्रायज्वलज्वालामालिनेॐह्रीं
श्रींक्लींतर्जनीभ्यांनमः॥ ॐनमोभगवतेमहारुद्रायज्वलज्वालामालिने
ॐह्रींश्रींक्लींमध्यमाभ्यांनमः॥ ॐनमोभगवतेमहारुद्रायज्वलज्वाला
मालिनेॐह्रींश्रींक्लींअनामिकाभ्यांनमः॥ ॐनमोभगवतेमहारुद्राय
ज्वलज्वालामालिनेॐह्रींश्रींक्लींकरतलकरपृष्ठाभ्यांनमः॥ एवंहृदया
दि॥ ॐनमो० हृदयाय०॥ ॐनमो० शिरसेस्वाहा॥ ॐनमो० शिखायैव
षट्॥ ॐनमो० कवचायहुं॥ ॐनमो० नेत्रत्रयायवौषट्॥ ॐनमो० अस्त्रा ॥राम॥
यफट्॥ इतिन्यासः॥ अथध्यानम्॥ वज्रदंष्ट्रंत्रिनयनंकालकंठमरिंद ॥४॥
मं॥ सहस्रकरमत्युग्रंवंदेदेवंसदाशिवम्॥ १॥ अतःपरंसर्वपुराणगु

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

ध्वंनिःशेषपापौघहरंपवित्रं॥जयप्रदंसर्वविपद्विमोचनंवक्ष्यामिशैवंक
वचंहितायते॥२॥इतिध्यात्वा॥ऋषभउवाच॥नमस्कृत्वामहादेवंसर्वव्या
पिनमीश्वरं॥वक्ष्येशिवमयंवर्मसर्वरक्षाकरंनृणां॥३॥शुचौदेशेसमा
सीनोयथावत्कल्पितासनः॥जितेंद्रियोजितःप्राणश्चिंतयेच्छिवमव्य
यं॥१॥हृत्पुंडरीकांतरसंनिविष्टंस्वतेजसाव्याप्तनभोवकाशं॥अतीं
द्रियंसूक्ष्ममनंतमाद्यंध्यायेत्परानंदमयंमहेशं॥२॥ध्यानावधूताखि
लकर्मबंधश्चिरंचिदानंदनिमग्नचेताः॥षडक्षरन्याससमाहितात्मा
शैवेनकुर्यात्कवचेनरक्षां॥४॥मांपातुदेवोखिलदेवतात्मासंसारकू
पेपतितंगभीरे॥तन्नामदिव्यंवरमंत्रमूलंधुनोतुमेसर्वमघंहृदिस्थं
॥५॥सर्वत्रमांरक्षतुविश्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा॥अणो
रणीयानुरुशक्तिरेकःसईश्वरःपातुभयादशेषात्॥६॥योभूस्वरूपे

5

शिवक० ॥५॥

णबिभर्तिविश्वंपायात्सभूमेर्गिरिशोष्टमूर्तिः॥योपांस्वरूपेणनृणां
करोतिसंजीवनंसोवतुमांजलेभ्यः॥७॥कल्पावसानेभुवनानिदग्ध्वा
सर्वाणियोनृत्यतिभूरिलीलः॥सकालरुद्रोवतुमांदवाग्नेर्वात्यादिभी
तेरखिलाच्चतापात्॥८॥प्रदीप्तविद्युत्कनकावभासोविद्यावराभीति
कुठारपाणिः॥चतुर्मुखस्तत्पुरुषस्त्रिनेत्रःप्राच्यांदिशिरक्षतुमाम
जस्रं॥९॥कुठारवेदांकुशपाशशूलकपालढक्काक्षगुणान्दधानः
॥चतुर्मुखोनीलरुचिस्त्रिनेत्रःपायादघोरोदिशिदक्षिणस्यां॥१०॥
कुंदेंदुशंखस्फटिकावभासोवेदाक्षमालावरदाभयांकः॥त्र्यक्षश्चतु
र्वक्त्रउरुप्रभावःसद्योधिजातोवतुमांप्रतीच्यां॥११॥वराक्षमालाभय ॥राम॥
टंकहस्तःसरोजकिंजल्कसमानवर्णः॥त्रिलोचनश्चारुचतुर्मुखोमां ॥५॥
पायादुदीच्यांदिशिवामदेवः॥१२॥वेदाभयेष्टांकुशटंकपाशकपालढ

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

5A

ङ्काक्षकशूलपाणिः॥सितद्युतिःपंचमुखोवतान्मामीशानमूर्ध्वंप
रमप्रकाशः॥१३॥मूर्धानमव्यान्ममचंद्रमौलिर्भालंममाव्यादथभा
लनेत्रः॥नेत्रेममाव्याद्भगनेत्रहारीनासांसदारक्षतुविश्वनाथः॥
१४॥पायाच्छ्रुतीमेश्रुतिगीतकीर्तिःकपोलमव्यात्सततंकपाली॥व
क्त्रंसदारक्षतुपंचवक्त्रोजिह्वांसदारक्षतुवेदजिह्वः॥१५॥कंठंगिरि
शोवतुनीलकंठःपाणिद्वयंपातुपिनाकपाणिः॥दोर्मूलमव्यान्ममध
र्मबाहुर्वक्षस्थलंदक्षमखांतकोव्यात्॥१६॥ममोदरंपातुगिरींद्रधन्वा
मध्यंममाव्यान्मदनांतकारी॥हेरंबतातोममपातुनाभिंपायात्कटिंधू
र्जटिरीश्वरोमे॥१७॥ऊरुद्वयंपातुकुबेरमित्रंजानुद्वयंमेजगदीश्वरोव्या
त्॥जंघायुगंपुंगवकेतुरव्यात्पादौममाव्यात्सुरवंद्यपादः॥१८॥महेश्व
रःपातुदिनादियामेमांमध्ययामेवतुवामदेवः॥त्र्यंबकःपातुतृतीययामे

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

6

शिवक॰ ॥६॥

वृषध्वजः पातुदिनांत्ययामे ॥१९॥ पायांनिशादौशशिशेखरोमांगगा
धरोरक्षतुमांनिशीथे ॥ गौरीपतिः पातुनिशावसाने मृत्युंजयोरक्ष
तुसार्वकालं ॥२०॥ अंतस्थितंरक्षतुशंकरोमांस्थाणुःसदापातुब
हिस्थितंमां ॥ तदंतरेपातुपतिःपशूनांसदाशिवोरक्षतुमांसमंतात्
॥२१॥ तिष्ठंतमव्याद्भुवनैकनाथःपायाद्व्रजंतंप्रमथाधिनाथः ॥ वेदांत
वेद्योवतुमांनिषण्णंमामव्ययःपातुशिवःशयानं ॥२२॥ मार्गेषुमांर
क्षतुनीलकंठःशैलादिदुर्गेषुपुरत्रयारिः ॥ अरण्यवासादिमहाप्र
वासेपायान्मृगव्याधउदारशक्तिः ॥२३॥ कल्पांतकाटोपपटुप्रकोप
स्फुटाट्टहासोच्चलितांडकोशः ॥ घोरारिसेनार्णवदुर्निवारमहाभ
याद्रक्षतुवीरभद्रः ॥२४॥ पत्त्यश्वमातंगघटावरूथसहस्रलक्षायुत
कोटिभीषणं ॥ अक्षौहिणीनांशतमाततायिनांछिंद्यान्मृडोघोरकुठा

॥राम॥ ॥६॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

6A

रधारया॥२५॥निहंतिदस्यून्प्रलयानलार्चिःचलत्त्रिशूलंत्रिपुरांतकस्य॥
शार्दूलसिंहर्क्षवृकादिहिंस्रात्संत्रासयत्वीशधनुःपिनाकः॥२६॥दुः
स्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि॥उत्
पाततापविषभीतिमसद्ग्रहार्तिंव्याधींश्चनाशयतुमेजगतामधीशः॥
२७॥ॐनमोभगवतेसदाशिवायसकलतत्वात्मकायसर्वमंत्रस्वरूपाय
सर्वमंत्राधिष्ठितायसर्वतंत्रस्वरूपायसर्वतत्वविदूरायब्रह्मरुद्रावतारिणे
नीलकंठायपार्वतीमनोहरप्रियायसोमसूर्याग्निलोचनायभस्मोद्धूलि
तविग्रहायमहामणिमुकुटधारणायमाणिक्यभूषणायसृष्टिस्थि
तिप्रलयकालरौद्रावतारायदक्षाध्वरध्वंसकायमहाकालभेदनायमू
लाधारैकनिलयायतत्वातीतायगंगाधरायसर्वदेवाधिदेवायषडाश्रया
यवेदांतसारायत्रिवर्गसाधनायानेककोटिब्रह्मांडजननकायानंतवासु

कितक्षककर्कोटकशंखकुलिकपद्ममहापद्मेत्यष्टमहानागकुलभूष
णायप्रणवस्वरूपायचिदाकाशायाकाशादिकस्वरूपायग्रहनक्षत्र
मालिनेसकलायकलंकरहितायसकललोकैककर्त्रेसकललोकैक
भर्त्रेसकललोकैकसंहर्त्रेसकललोकैकगुरवेसकललोकैकसाक्षि
णेसकलनिगमगुह्यायसकलवेदांतपारगायसकललोकैकवरप्र
दायसकललोकैकशंकरायशशांकशेखरायशाश्वतनिजाभासा
यनिराभासायनिरामयायनिरहंकारायनिरा यनिराकुलायनिष्क
लंकायनिर्गुणायनिष्कामायनिरुपप्लवायनिरवद्यायनिरंतरायनि
ष्कारणायनिरातंकायनिष्प्रपंचायनिःसंगायनिर्द्वंद्वायनिराधाराय ॥राम॥
निरागायनिष्क्रोधायनिर्गमायनिष्पापायनिर्भयायनिर्विकल्पायनि १७॥
र्भेदायनिष्क्रियायनिस्कलायनिःसंशयायनिरंजनायनिरूपमविभ

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

7A

यायनित्यशुद्धबुध्यपरिपूर्णसच्चिदानंदाद्वयायपरमशांतस्वरूपा
यतेजोरूपायतेजोमयायजयजयरुद्रमहारौद्रभद्रावतारमहाभैर
वकालभैरवकल्पांतभैरवकपालमालाधरखट्वांगचर्मपाशां
कुशडमरुकशूलचापबाणगदाशक्तिभिंदिमाळातोमरमुसलमु
द्गरप्रासपरिघपट्टीशभुशुंडीशतघ्नीचक्राद्यायुधभीषणकरसह
स्रमुखदंष्ट्राकरालवदनविकटाट्टहासविस्फारितब्रह्मांडमंडल
नागेंद्रकुंडलनागेंद्रहारनागेंद्रवलयनागेंद्रचर्मधरमृत्युंजयत्र्यं
बकत्रिपुरांतकविश्वरूपविरूपाक्षविश्वेश्वरवृषभवाहनविश्वतो
मुखसर्वतोरक्षरक्षमाज्वलज्वलमहामृत्युमपमृत्युभयंनाशयनाश
यरोगभयमुत्सादयोत्सादयविषसर्पभयंशमयशमयचोरान्मारय
मारयममशत्रूनुच्चाटयोच्चाटयशूलेनविदारयविदारयकुठारेणभिं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

4

शिवक॰ ॥६॥

धिभिंधिख[illegible]ङ्केनकिंधिकिंधिखद्वांगेनविपोथयविपोथयमुसल्लेननिष्पेषयनिष्पेषयबाणेःसंताडयसंताडयरक्षांसिभीषयभीषयशेषभूतानिविद्रावयविद्रावयकूष्मांडवेतालमारीचब्रह्मराक्षसगणान्संत्रासयसंत्रासयममाभयंकुरुकुरुवित्रस्तमाश्वासयाश्वासयनरकभयान्मामुद्धारो[illegible]यसंजीवयक्षुत्तृड्भ्यांमामाप्याययाप्याययदुःखातुरमानंदयानंदयशिवकवचेनमामाछादयाछादयमृत्युंजयत्र्यंबकसदाशिवनमस्तेनमस्ते

इत्येतंमहामंत्रंसहस्रवर्णात्मकं[illegible]सहस्राद्यस्याशतात्यस्यैकादशावृत्तोवाजस्याजपसमाप्तोपूर्ववन्न्यासं॥ गुह्यं ब्रह्मरूपं शिवपंचाक्षरादिशतमंत्रंजप्त्वा॥ ऋषभउवाच॥ इत्येतत्कवचंशैवंवरदंव्याहृतंमया॥ सर्वबाधाप्रशमनंरहस्यंसर्वदेहिनां॥ १॥ यःसदाधारयेन्मर्त्यःशैवंकवचमुत्तमं॥ ॥राम॥ ॥६॥

8A

नतस्यजायतेक्कापिभयंशंभोरनुग्रहात् ॥२॥ क्षीणायुःप्राप्तमृत्युर्वा
महारोगहतोपिवा ॥ सद्यःसुखमवाप्नोतिदीर्घमायुश्चविंदति ॥३॥ सर्व
दारिद्र्यशमनंसौमंगल्यविवर्धनं ॥ योधत्तेकवचंशैवंसदेवैरपिपूज्य
ते ॥४॥ महापातकसंघातैर्मुच्यतेचोपपातकैः ॥ देहांतेमुक्तिमाप्नोति
शिववर्मानुभावतः ॥५॥ त्वमपिश्रद्धयावत्सःशैवंकवचमुत्तमं ॥ धारय
स्वमयादत्तंसद्यश्श्रेयोह्यवाप्स्यसि ॥ सूतउवाच ॥ इत्युक्त्वाऋषभोयो
गीतस्मैपार्थिवसूनवे ॥ ददौशंखंमहारावंखड्गंचारिनिषूदनं ॥७॥ पुन
श्चभस्मसंमंत्र्यतदंगंपरितःस्पृशन् ॥ गजानांषट्सहस्रस्यद्विगुणं
चबलंददौ ॥८॥ भस्मप्रभावात्संप्राप्तबलैश्वर्यधृतिःस्मृतिः ॥ सराजपुत्रः
शुशुभेशरदर्कइवश्रिया ॥९॥ तमाहप्रांजलीभूयःसयोगीनृपनंदनः ॥
एषखड्गोमयादत्तस्तपोमंत्रानुभावतः ॥१०॥ सितधारमिमंखड्गंयस्मै

9

शिवक० दर्शयसेस्फुटं ॥ ससद्योम्रियतेशत्रुःसाक्षान्मृत्युकरपिस्वयं ॥ ३१ ॥ अस्य
॥२॥ शंखस्यनिह्रादंयेशृण्वंतितवाहिताः ॥ तेमूर्छिताःपतिष्यंतिन्यस्तशस्त्र
स्त्राविचेतनाः ॥ ३२ ॥ खड्गशंखाविमौदिव्यौपरसैन्यविनाशनौ ॥ आ
त्मसैन्यस्वपक्षाणांशौर्यतेजोविवर्धनं ॥ ३३ ॥ एतयोश्चप्रभावेनशै
वेनकवचेनच ॥ द्विषट्सहस्रनागानांबलेनमहतापिच ॥ ३४ ॥ भस्म
धारणसामर्थ्याच्छत्रुसैन्यंविजेष्यसि ॥ प्राप्यसिंहासनंपैत्र्यंगोप्ता
सिपृथिवीमिमां ॥ ३५ ॥ इतिभद्रायुषंसम्यगनुशास्यसमातृकं ॥
ताभ्यांसंपूजितःसोथयोगीस्वैरगतिर्ययौ ॥ ३६ ॥ इतिश्रीस्कंदपुरा
णेब्रह्मोत्तरखंडेशिववर्मकथनंनामद्वादशोध्यायः ॥ श्रीसांबसदाशि ॥राम॥
वार्पणमस्तु ॥ फलंशृण्वंतिसततंपठित्वासततंहिभूतिमभिमंत्र्य ॥ श्री ॥२॥
सांबसदाशिवायेनिजपंनिवेद्य ॥ उत्थानिरुत्थगोप्तात्वंग्रहास्मत्कं

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

9A

तंजपं ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ पूर्वोक्तप्रकारेण पंचो
पचारैः मानसीं पूजां विधाय ॥ उत्तरन्यासं षडंगं विधाय ॥ तद्रूपमात्मा
नं भावयेत् ॥ पूजनंचाप्यतिरिक्तंचाय भयामोहतस्परं कृतंतदस्तु संपूर्णं
त्वत्प्रसादान्महेश्वर ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यू
नं संपूर्णतां याति सद्यो वंदे तमच्युतं ॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भ
वेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ यत्कृतं जपपूजादि विहितं
परमेश्वर ॥ मोक्षापवर्गसिध्यर्थं गृहाण परमेश्वर ॥ जपपूजादिकं देव
यत्कृतं तदनुग्रहात ॥ तेन श्रीभगवान् रुद्रः प्रीयतां न मम ॥ भूमौ स्खलि
तपादानां भूमिरेवावलंबनं ॥ त्वयि जातापराधानां त्वमेव शरणं मम ॥ ना
थ योनिसहस्रेषु येषु येषु व्रजाम्यहं ॥ तेषु तेष्वच्युता भक्तिर्ममास्तु त्वयि
संतत ॥ स्वामिं सर्व जगन्नाथ यावत्पूजावसानकं ॥ तावत्त्वं प्रीतिभावेन देवेस्मि
न् संनिधौ भव ॥ इति शिवकवचं समाप्तं ॥ शके १७९६ मार्ग. कृ. ११ रवौ स
माप्तः ॥ श्रीरामचंद्रार्पणमस्तु ॥ श्रीरामः प्रीयतां ॥ श्रीराम समर्थ ॥ ७

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com